शुद्धिकौमुदी

पाठः १३ - २९.०७.२०१७

सुबन्ताः

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

१२६. शिवरामेण **शिक्षाशास्त्री** पठिता ।

‘शिक्षाशास्त्रं पठितम्’ इति कथनम् औचित्यम् आवहति । यथास्थितं तु इदं वाक्यं आकुलितम् अस्ति । न हि ‘शिक्षाशास्त्री’ इत्येषः शाब्दः स्त्रियाम् । अतः ‘पठिता’ इति प्रयोगः असाधुः । ‘शिक्षाशास्त्री’ इति उपाधेः (उपाधिमतः वा) नाम । तच्च पदम् इन्नन्तम् । अतः ‘शिक्षाशास्त्रिणम्’ इति स्यात् द्वितीयान्तः प्रयोगः । पठनविषयः न उपाधिः । पठ्यते हि शास्त्रम् । अतः, ’शिक्षाशास्त्रं पठितम्’ इति प्रयोगः औचित्यम् आवहति ।

१२७. सः मम विषये **निर्लक्ष्यतया** व्यवहरति ।

‘निर्लक्ष्यतया’ इति अस्थाने । ‘उपेक्ष्य’ इति प्रयोक्तव्यम् । निर्लक्ष्यशब्दः उपेक्षापर्यायः न । निर्गतं लक्ष्यं यस्मात् सः निर्लक्ष्यः । तन्नाम लक्ष्यहीनः । तस्य भावः निर्लक्ष्यता । एतस्मिन् वाक्ये लक्ष्यहीनतायाः न कापि प्रसक्तिः । ‘उपेक्षा’ अत्र वक्तव्या अस्ति । अतः ‘उपेक्षया’ इति प्रयोगः एव साधुः ।

एवमेव ‘निर्लक्षितवान्’ इति प्रयोगः अपि श्रूयते । तत्रपि ‘उपेक्षितवान्’ इति प्रयोक्तव्यम् ।

१२८. अद्य देशस्य **प्रधानी** भाषणं करिष्यति ।

‘प्रधानी’ इति अयुक्तम् । ‘प्रधानमन्त्री’ इति, ‘प्रधानः’ इति वा प्रयोक्तव्यम् ।

प्रधानः, प्रमुखः मन्त्री प्रधानमन्त्री । मन्त्रिशब्दः यदि न इष्यते तर्हि ‘प्रधानः’ इत्यपि प्रयोगः शक्यः । ‘प्रधानी’ इति इन्नन्तं पदं न प्रयुक्तपूर्वम् । प्रधानः अस्य अस्तीति प्रधानी इति अर्थः उपवर्णनीयः स्यात् । तदा तु ‘प्रधानयुक्तः’ इति अर्थः सिध्यति । तस्मिन् अर्थे अपि तस्य प्रयोगस्य असत्वात् तस्य प्रयोगस्य परिहारः एव वरम् ।

१२९. शत्रवः **षड्यन्त्रं** कुर्वन्तः सन्ति ।

‘षड्यन्त्रम्’ इति अस्थाने । ‘कुतन्त्रम्’ इति प्रयोक्तव्यम् । ‘षड्यन्त्रम्’ इति शब्दः एव व्युत्पन्नः न भवति । षण्णां यन्त्रणां समाहारः इति विग्रहे उक्ते ‘षड्यन्त्री’ इति रूपं स्यात् । अन्यच्च तादृशः अर्थः अत्र न अभिप्रेतः एव । जयादिनिमित्तं वाममार्गेण उपायः यः चिन्त्यते सः निर्देष्टुम् इष्टः अत्र । तदर्थं ‘कुतन्त्र’शब्दः प्रयोक्तव्यः । कुत्सितं तन्त्रं कुतन्त्रम् । तन्त्रपदस्य उपायः, व्यवहारः इत्यादयः अर्थः ।

१३०. पुस्तकस्य आवश्यकता नास्ति मम ।

‘**आवश्यकता**’ इति प्रयोगः न दोषाय । अवश्यम्भावः आवश्यकम् । भावे वुञ्प्रत्ययः । आवश्यकशब्देनैव भावस्य उक्तत्वात् पुनः भावार्थे तल्प्रत्ययेन नार्थः’ इति वदन्ति केचन । अतः आवश्यकताशब्दस्य असाधुत्वं मन्यन्ते ते । ‘आवश्यकशब्दः धर्मपरः’ इति तेषां कथनस्य सारः । किन्तु आवश्यकशब्दः धर्मिपरत्वेनापि बहुधा दृश्यते । यथा –

शेषाधिकारस्ताव**दावश्यकः**

- तत्त्वबोधिनीव्याख्या (‘शेषे’ इति सूत्रे)

षादीनां निवृत्त्यर्थमप्यधिकारः **आवश्यकः** ।

- तत्त्वबोधिनीव्याख्या (‘शेषे’ इति सूत्रे)

तृतीयासमासोऽपि **आवश्यक** इति त्वन्ये

- तत्त्वबोधिनीव्याख्या (‘पूर्वसदृश..‘ सूत्रे)

एतेषु त्रिष्वपि धर्मिपरत्वं स्फुटम् । धर्मिपरत्वाभावे समानविभक्तिकत्वम् अनुपपन्नं स्यात् ।

'आवश्यकत्व' प्रयोगो यथा -

- तस्येदम् इत्यादौ.....ग्रहणाभावाय तदा**वश्यकत्वात्** । - बालमनोरमाव्याख्या ('शेषे' इति सूत्रे)
- .....ग्रहणलाभाय तदा**वश्यकत्वात्** । - बालमनोरमाव्याख्या ('शेषे' इति सूत्रे)
- ....अतस्तेषु समासविधानस्या**वश्यकत्वात्**..... - विभाषा – २.१.१२ इत्यस्य व्याख्याने बालमनोरमायाम्

अत्र त्रिष्वपि वाक्येषु 'आवश्यकत्व'प्रयोगः कृतः अस्ति । 'आवश्यकत्व'पदस्य 'आवश्यकता'पदस्य च समानार्थकत्वम् । यदि 'आवश्यकता' इत्येतत् अयुक्तं तर्हि बालमनोरमायां प्रयुक्तस्य 'आवश्यकत्व'पदस्यापि अयुक्तता वक्तव्या भवेत् । तस्मात् 'आवश्यकता' इति तु साधु एव ।

उभयोरपि साधुत्वप्रकारः इत्थं दर्शयितुं शक्यः-

अवश्यं भावः आवश्यकम् । भावे वुञ् । आवश्यकमस्य अस्तीति आवश्यकः । अर्श आदिभ्यो अच् – ६.२.१२८ इति सूत्रेण मत्वर्थे अच् । आवश्यकवान् इत्यर्थः फलितः भवति । तस्मात् 'शेषाधिकारः आवश्यकः' इत्यादयः प्रयोगाः सिद्धाः । इत्थं व्युत्पादितात् आवश्यकशब्दात् (मत्वर्थीयाजन्तात्) त्वप्रत्यये आवश्यकत्वमिति, तल्प्रत्यते च आवश्यकता इति च सिद्धम् । तदा बालमनोरमापङ्क्तिरपि युक्ता एव ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

१३१. सः देशसेवायै **स्वात्मानं** समर्पितवान् अस्ति ।

‘स्वात्मानम्’ इति प्रयोगः अस्थाने । ‘आत्मानम्’ इति प्रयोगः साधुः ।

आत्म-स्वशब्दयोः समानः अर्थः । समानार्थकानि पदानि एकस्मिन् एव वाक्ये न प्रयुज्यन्ते । तेषु अन्यतमः प्रयुज्यते । अतः अत्र ‘स्व’शब्दस्य परित्यागः करणीयः । ‘आत्मानम्’ इति प्रयोगः करणीयः । आत्मशब्दं परित्यज्य स्वशब्दमात्रस्य प्रयोगः अपि कर्तुं शक्यः ।

स्वशब्दस्य ‘आत्मीयः’ इत्यपि अर्थः अस्ति । तथापि आत्मनः स्वेति विशेषणम् अत्र न औचित्यमावहति ।

१३२. बालेन पठनं लेखनम् **इत्यादि** कृतम् ।

‘इत्यादि’ इति प्रयोगः न असाधुः । इति आदिः यस्य तत् इत्यादि । विशेष्ये पदस्य अनुपादानात् नपुंसकता । जातौ एकवचनम् । तस्मात् ‘इत्यादि’ इति सिद्धम् । अथवा कार्यजातादिषु अन्यतमं पदम् अध्याह्रियताम् । तस्मादपि एकवचनत्वसिद्धिः ।

१३३. गृहं निर्मातव्यं, धनं सम्पादनीयम् **इत्यादि आशाः** मम न सन्ति ।

'**इत्यादयः आशाः**' इति, '**इत्याद्याशा**' इति वा प्रयोक्तव्यम् । इत्यादिशब्दः आशायाः विशेषणम् । आशाशब्दः बहुवचनान्तः अस्ति । अतः इत्यादिशब्दः अपि बहुवचनान्तः स्यात् । तस्मात्, 'इत्यादयः आशाः' इति प्रयोगः । यदि तयोः पदयोः समासः क्रियेत तर्हि 'इत्याद्याशाः' इति रूपम् ।

'इत्यादि आशाः' इत्यत्र तु विभक्तिः न योजिता, न वा समासः कृतः । 'अपदं न प्रयुञ्जीत' (प्रातिपदिकमात्रं न प्रयोक्तव्यम्) । किन्तु तस्य अन्वयः 'आशा'पदे भवितुं न अर्हति । अतः, 'इत्यादि' इति नपुंसके इत्येवम् उक्त्वा समर्थयितुं क्रियमाणः प्रयासः व्यर्थः एव ।

सुबन्ताः

१३४. अरण्ये विविधाः सस्य**प्राणि**पक्षिणः भवन्ति ।

‘प्राणि’शब्दः अत्र अस्थाने । ‘**पशु**’शब्दः प्रयोक्तव्यः । प्राणी नाम प्राणवान् । प्राणाः तु मानवानां, पशूनां, पक्षिणाम् अन्येषां जीविनां च भवन्ति । एवं प्राणवन्तः सर्वे प्राणिनः भवन्ति । तस्मात् मानवाः अपि प्राणिनः एव । प्राणिषु अन्यतमा पशवः । उपर्युक्ते वाक्ये ते पशवः एव निर्देष्टुम् इष्टाः । तस्मात् सस्यपशुपक्षिणः इति प्रयोक्तव्यम् ।

१३५. भाषाक्षेत्रे संस्कृतस्य **महत्त्वं स्थानम्** अस्ति ।

‘महत्त्वं स्थानम्’ इति असाधु। ‘महत्त्वभूतं स्थानम् इति प्रयोगः उचितः ।

‘महत्त्व’शब्दं विशेषणं कर्तुम् इच्छति वाक्यस्य प्रयोक्ता । विशेषणं धर्मिपरं चेदेव विशेष्येण समानविभक्तिकतया अन्वयं प्राप्नोति । ‘महत्त्वम्’ इत्येतत् धर्मपरम् । महतः भावः महत्त्वम् । एवं धर्मपरः शब्दः सामानाधिकरण्येन ‘स्थान’शब्देन अन्वयं प्राप्तुं न अर्हति । अतः, ‘महत्त्वभूत’शब्दः प्रयोक्तव्यः । स च धर्मिपरः । सः विशेषणत्वेन अन्वयं प्राप्नोति । तस्मात् ‘महत्त्वभूतं स्थानम्’ इति प्रयोगः साधुः भवति।

१३६. निरुद्योगः भारतस्य ज्वलन्तसमस्या अस्ति ।

'ज्वलन्तसमस्या' इति अपशब्दः । '**महती समस्या**' इति, मार्गान्तरेण वा प्रयोगः करणीयः ।

ज्वलन्ती + समस्या इति स्थिते पूर्वोत्तरपदयोः विभक्तिलोपे, पुंवद्भावे, समस्तपदात् पुनः सुबुत्पत्तौ 'ज्वलत्समस्या' इति रूपम् । 'ज्वलन्तः' इति तु पुंसि प्रथमाबहुवचनान्तं रूपम् । समासे तु विभक्त्यन्तानि रूपाणि पूर्वपदत्वेन न दृश्यन्ते, अलुक्समासात् ऋते । पूर्वपदानां प्रतिपदिकरूपेण स्थितिः ।

'ज्वलत्समस्या' इति रूपं तु भवति । न हि समस्या ज्वलति । सा हि अस्मान् ज्वालयति । या ज्वलति सा क्षीयते । क्षयार्थज्ञापकात् विशेषणात् समस्यायाः उग्रता एव वक्रा ज्ञापयितुम् इष्टा । तस्मात् 'महती सम्स्या' इति प्रयोगः वरम् । अथवा भङ्ग्यन्तरेण प्रयोगः अपि भवितुम् अर्हति ।

१३७.पूजासमये अर्चकेन '**आरतिः**' कृता ।

आरतिः इति प्रयोगः अनुचितः । '**नीराजनम्**' इति प्रयोक्तव्यम् । आरतिपदस्य विश्रान्तिः, निवृत्तिः इत्यादयः अर्थाः वर्णिताः कोषकारैः। नीराजनार्थः केनापि न वर्णितः । तस्मात् आरतिः इति प्रयोगः अस्थाने । 'नीराजनम्' इति प्रयोगः उचितः । केचन 'आरार्तिकम्', 'आरात्रिकम्' इत्यादीनि पदानि प्रयुञ्जते । तेषां साधुत्वकथनप्रकारः तु न ज्ञायते । अतः तेषां परिहारः अपि वरम् एव इति भाति ।

१३८. देहलीनगरे मया गान्धि**समाधिः** दृष्टा ।

'गान्धिसमाधिः दृष्टा' इति प्रयोगः अशुद्धः । 'गान्धि**स्मारकं दृष्टम्**' इति प्रयोक्तव्यम् ।

प्रसिद्धस्य पुरुषस्य दिवंगतेः अनन्तरं तस्य स्मरणाय किञ्चन स्मारकं निर्मियते । प्रादेशिकभाषासु तस्य 'समाधिः' इति नाम । संस्कृतभाषायां तत् 'स्मारकम्' इति उच्यते । समाधिपदं योगशास्त्रीयं पारिभाषिकं पदम् । एकाग्रतया मनसः स्थापनरूपः ध्येयमात्रस्मरणरूपः ध्यानविशेषः 'समाधिः' इति उच्यते । समाधिः अन्यः, स्मारकं शवस्थानं वा अन्यत् । तयोः अभेदेन व्यवहारः नास्ति । अन्यच्च, समाधिशब्दः पुंसि । अतः 'समाधिः दृष्टा' इति प्रयोगः अनुचितः । 'समाधिः दृष्टः' इति पुंसि प्रयोक्तव्यम् ।

१३९. शिष्येण **गुरवे गुरुदक्षिणा** दत्ता ।

'गुरवे दक्षिणा दत्ता' इति प्रयोगः उचितः । गुरवे य दक्षिणा दीयते, सा उच्यते 'गुरुदक्षिणा' इति । एतस्मिन् वाक्ये 'गुरु'शब्दः द्विवारम् उपात्तः दृश्यते । तत् अनुचितम् । 'गुरवे दक्षिणा दत्ता' इति आनुपूर्वी एव शोभते ।

एवमेव —

ग्रामस्य	ग्रामाधिकारी
ग्रामस्य	ग्रामदेवता
कार्यालयस्य	कार्यालयप्रमुखः
गृहस्य	गृहस्वामी/गृहरक्षकः
देवस्य	देवालयः
ग्रन्थस्य	ग्रन्थपरिचयः
राशेः	राश्यधिपतिः
राज्ञः	राजकुमारः

इत्यादयः प्रयोगाः अनुचिताः । समानार्थकौ उभौ शब्दौ (एकः षष्ठ्यन्तः, अपरः समासाङ्गभूतः) समाने वाक्ये न प्रयोक्तव्यौ ।

vyoma ॥वाचं धेनुमुपासीत॥ Saṃskṛtam · Value Education · Technology

१४०. एतस्मात् मम **बहुखेदः** जातः ।

गुरौ **बहुश्रद्धा** तस्य ।

अत्र वाक्यद्वये अपि बहुशब्दः प्रयुक्तः । आधिक्यार्थे सः अत्र प्रयुक्तः । बहुशब्दप्रयोगे न दोषः । किन्तु तत्र संस्कृतत्वं सौन्दर्यं वा न्यूनम् । एतादृशे अवसरे महच्छब्दः प्रयुज्यते संस्कृतक्षेत्रे । तस्मात् **'महान् खेदः'**, **'महती श्रद्धा'** इत्येवं प्रयोगः शोभते ।

महच्छब्दः अन्यासु भाषासु एतेन प्रकारेण न प्रयुज्यते । संस्कृते तु महान् तस्य प्रयोगप्रसरः ।

केचन प्रयोगाः यथा –

महत् दुःखम्	महान् आनन्दः
महती निद्रा	महान् सम्मर्दः
महती वेदना	महत् आश्चर्यम्
महान् आदरः	महती असूया
महान् कोपः	महान् उत्कर्षः

vyoma ॥वाचं धेनुमुपासीत॥ Saṃskṛtam · Value Education · Technology

१४१. ह्यः **मम मित्रम् आगतवान्** आसीत् ।

'मित्रम् आगतवान्' इति वाक्यम् अशुद्धम् । **'मित्रम् आगतवत्'** इति वक्तव्यम् ।

मित्रशब्दः नपुंसके । 'आगतवान्' इति तु पुंसि । आगतवच्छब्दस्य पुंस्त्वम् अत्र न सङ्गच्छते । मित्रशब्दस्य नपुंसकत्वात् आगतवच्छब्दस्य अपि नपुंसकता एव स्यात् । अतः 'मित्रम् आगतवत्' इत्येव प्रयोक्तव्यम् । 'मम मित्रं रमेशः आगतवान्' इति वाक्यप्रयोगः यदि भवति, तन्नाम रमेशपदस्य मध्ये निवेशः यदि भवति तर्हि 'आगतवान्' इति पुंलिङ्गप्रयोगः सङ्गच्छते एव । मित्रशब्दः विशेषणं सत् गौणतां भजते । रमेशशब्दस्यैव प्राधान्यम् । तस्य पुंस्त्वात् आगतवच्छब्दस्यापि पुंस्त्वं युज्यते एव ।

१४२. यदि जनाः श्रद्धया कार्यं कुर्वन्ति **चेत्** देशस्य प्रगतिः सिध्येत् ।

'यदि' इत्यस्य यः अर्थः सः अर्थः 'चेत्' इत्यस्यापि । अतः तयोः अन्यतरः प्रयोक्तव्यः । तन्नाम 'यदि'शब्दः प्रयुक्तः चेत् 'चेत्'शब्दः परिहरणीयः । 'चेत्' प्रयुक्तं चेत् 'यदि'शब्दः परिहरणीयः । समानार्थकयोः सहप्रयोगः न युज्यते ।

सुबन्ताः

१४३. **शैत्यात्** तस्य नासिकातः सिङ्घाणः स्रवति ।

'**पीनसात्**' इति प्रयोक्तव्यम् । शीतस्य भावः शैत्यम् । जलादिषु तत् दृश्यते । हेमन्तादिषु कुज्झटिकाहिमादिकारणतः परिसरे अपि शैत्यं दृश्यते । ज्वरादिषु प्रसङ्गेषु अपि शैत्यम् अनुभूयेत । 'पीनसः' तु नासिकासम्बद्धः कश्चन रोगः । ' प्रतिश्यायः' इति तस्य अपरं नाम । नासिकातः स्रावः पीनसकारणतः जायते, न तु शैत्यकारणतः । पीनसः तु शैत्यकाले यथा, तथैव औष्ण्यकाले अपि भवितुम् अर्हति । अतः शैत्यम् अन्यत्, पीनसः अन्यः एव ।

१४४. पीनसकारणतः निरन्तरं **क्षुवः** मम ।

'क्षुवः' इति अपशब्दः । 'क्षवः' इति, 'क्षुतम्' इति वा प्रयोक्तव्यम् ।

टु क्षु (शब्दे)+ (भावे) क्तः = क्षुतम् । टु क्षु (शब्दे) + अप् = क्षवः । उभयोः अपि समानः अर्थः । क्षुवः इत्यस्य साधुता तु नास्ति । अतः सः न प्रयोक्तव्यः ।

सुबन्ताः

१४५. सुभाषचन्द्रादीनां जन्मतः देशस्य **घनता** प्रवृद्धा ।

‘घनता’ इति प्रयोगः अस्थाने । **‘गौरवम्’** इति प्रयोक्तव्यम् । घनशब्दस्य सान्द्रादयः अर्थाः सन्ति । किन्तु गौरवार्थकत्वं नास्ति तस्य । अतः पूर्वोक्ते वाक्ये ‘घनता’ इति प्रयोगः अस्थाने । ‘गौरवम्’ इति प्रयोगः औचित्यम् आवहति ।

१४६. मातुः वचने पुत्रः **लक्ष्यं** न ददाति ।

‘लक्ष्यम्’ इति पदम् अस्थाने । **‘अवधानम्’** इति प्रयोक्तव्यम् । ‘लक्ष्य’पदस्य ‘उद्दिष्टम्’, ‘लक्षणेन युक्तम्’ इत्यादयः अर्थाः । उपर्युक्ते वाक्ये ते च अर्थाः न अभिप्रेताः । ‘अवधानम्’ इत्यर्थः अभिप्रेतः । अवधानं नाम मनसः एकाग्रता । अतः लक्ष्यम् अन्यत् । अवधानम् अन्यत् एव । तयोः न पर्यायता ।

सुबन्ताः

---

१४७. केचन जनाः **ध्येयविहीनं** जीवनं यापयन्ति ।

अत्र 'ध्येय'पदस्य स्थाने 'लक्ष्य'पदस्य निवेशनं वरम् । यत् ध्यातुं योग्यं (ध्यातुम् अर्हं वा) भवति तत् ध्येयम् । (ध्यै चिन्तायाम् + यत्) लक्ष्यं तु उद्दिष्टं भवति । यद्यपि यत् लक्ष्यं भवति तत् ध्येयम् एव भवति, तथापि ध्येय-लक्ष्ययोः अस्ति एव सूक्ष्मः कश्चन भेदः ।

कश्चन अलसः बालः अस्ति इति चिन्त्यताम् । परीक्षायाम् उत्तीर्णताप्राप्तिः तस्य लक्ष्यम् । किन्तु सः सर्वदा ध्यायति क्रीडादिकम् । एतादृशे प्रसङ्गे तस्य लक्ष्यम् अन्यत्, ध्येयं भवति अन्यत् एव । तस्मात् तयोः अर्थभेदः स्फुटः ।

तथापि लक्ष्यं यस्य जीवने प्रमुखं तस्य जीवने ध्येयम् अपि तदेव भवति इत्यतः ध्येयलक्ष्ययोः क्वचित् पर्यायता अपि सम्भवति । स्मर्तव्यम् अत्र यत् एषा समानार्थकता क्वचिदेव इति ।

१४८. कफदोषादिकारणतः शरीरेऽपि **कृमिः/क्रिमिः** जायते ।

‘कृमिः’, ’क्रिमिः’ इति रूपद्वयम् अपि साधु एव । पादविक्षेपार्थकस्य ‘क्रमु’धातोः इतप्रत्ययः- ‘क्रमितमिशतिस्तम्भामत इच्च’ (३.४.१२१) इति सूत्रेण । तदा च ‘क्रिमिः’ इति रूपम् । पूर्वसूत्रात् सम्प्रसारणस्य अनुवृत्तेः ‘कृमिः’ इत्यपि रूपम् । अतः रूपद्वयम् अपि साधु एव । तथा हि कोषः (मेदिनी) - ‘कृमिर्ना क्रिमिवत्कीटे लाक्षायां कृमिले खरे’ इति ।

१४९. अद्य नाटके पात्रधारिणां **वेषः / वेशः** उत्कृष्टः आसीत् ।

‘वेषः’, ‘वेशः’ इति रूपद्वयम् अपि साधु एव ।

‘वेषः’ इत्यत्र विष्लृ(व्याप्तौ) धातोः घञ् । ‘वेशः’ इत्यत्र विश(प्रवेशने) धातोः घञ् । (विशन्ति नयनानि अत्र) धातुभेदात् रूपभेदः ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

१५०. अहं **सर्वविधेनापि** भवतः साहाय्यं करिष्यामि ।

'सर्वविधया' इति प्रयोगः युक्ततरः । विधा नाम प्रकारः । प्रकारार्थकः सः स्त्रियाम् । तथा हि कोषः - 'विधा गजान्ने ऋद्धै च प्रकारे वेतने विधौ' (मेदिनी) । पुंसि नपुसके वा सः न आम्नातः । अतः 'विधेन' इति रूपं न सिद्ध्यति । 'विधा'शब्दस्य तृतीयान्तं रूपम् (ए.व.) 'विधया' इति ।

१५१. **सर्वविधैरपि** उपायैः कार्यस्य सिद्धिः चिन्तनीया ।

'सर्वविधैः' इति प्रयोगः न दोषाय ।

विधाशब्दः आकारान्तः इति पूर्वम् उक्तम् । एवं स्थिते 'सर्वविधैः' इति रूपं कथम् ? सर्वविधाभिः' इति स्यात् खलु ?' इति प्रश्नः उदियात् कदाचित् । मास्तु तत्र भ्रान्तिः । 'सर्वविध'शब्दः तु अकारान्तः । अतः, 'सर्वविधैः' इति तदीयं तृतीयाबहुवचनान्तं रूपम् एव ।

'विधा'शब्दः आकारान्तः इति तु सत्यम् । 'सर्वविध'शब्दः तस्मात् अन्यः । सः बहुव्रीहिसमासान्तः । अतः, सः उपायस्य विशेषणम् । उपायशब्दः पुंसि । तस्मात् तद्विशेषणभूतः सर्वविधशब्दोऽपि पुंसि एव ।

एवमेव 'अनेकविधाः', 'बहुविधाः', 'बहुविधाः', 'नानाविधाः' इत्यादयः शब्दाः अपि भवन्ति विशेष्यनिघ्नाः ।

सुबन्ताः

१५२. साधु, भवता **समर्पकं** कार्यं कृतम् ।

'समर्पकम्' इति प्रयोगः अस्थाने । '**समुचितम्**' इति, '**योग्यम्**' इति वा प्रयोक्तव्यम् ।

समर्पणं यः करोति सः भवति समर्पकः । अत्र तादृशः अर्थः न अभिप्रेतः । कार्यस्य समुचितत्वं सुयोग्यत्वं वा प्रतिपादनीयम् अस्ति अत्र। तस्मात् तादृशः एव पदप्रयोगः चिन्तनीयः । केचन संस्कृतशब्दाः यस्यार्थस्य वाचकाः भवन्ति, तस्यैवार्थस्य वाचकाः न भवन्ति, ते यदा प्रादेशिकभाषायां प्रयुज्यन्ते । अतः, विषयेऽस्मिन् अवधानवद्भिः भवितव्यं प्रयोक्तृभिः ।

१५३. क्रुद्धेन तेन **गाली दत्ता** ।

'गालिः' इति प्रयोक्तव्यम् । स च शब्दः पुंसि । अतः, 'गालिः दत्तः' इति भवेत् आनुपूर्वी ।

गालिर्नाम शपनं निन्दा वा । गाल्यते विक्रियते श्रवणमात्रेण मनो यस्मात् येन वा । गल (प्रस्रवणे) + णिच् + इत् । 'गालिः शपनम्' इति त्रिकाण्डकोषः । हिन्द्यादिभाषासु तस्य पदस्य ईकारान्तता स्त्रीत्वं च दृश्यते । संस्कृतभाषायां तु तस्य ईकारान्तता पुंस्त्वं च कोषकारैः निर्दिष्टं दृश्यते ।

१५४. उद्याने जनाः **आरामेण** उपविशन्ति ।

‘आरामेण’ इति प्रयोगः अस्थाने । ‘सुखेन’ इति, ‘ससुखम्’ इति वा प्रयोक्तव्यम् ।

वाक्यप्रयोक्ता सुखोपवेशनम् इच्छति । किन्तु, पदप्रयोगः तेन अन्यथा कृतः । आरामः नाम उद्यानम् उपवनं वा । सुखार्थकत्वं तस्य पदस्य नास्ति । हिन्द्यादिभाषासु तदस्ति, न तु संस्कृते । प्रादेशिकभाषाप्रभावकारणतः क्रियमाणः प्रयोगः अयम् ।

१५५. कार्यक्रमान्ते कार्यकर्त्रा **आभार**प्रदर्शनं कृतम् ।

‘**कृतज्ञता ज्ञापिता**’, ‘**धन्यवादाः समर्पिताः** ’ इत्यादीनि वाक्यानि अत्र प्रयोक्तव्यानि । ‘आभारः’ इति पदम् अस्थाने ।

‘भार’शब्दस्य यः अर्थः सः एव भवितुम् अर्हति ‘आभार’शब्दस्यापि । स च अर्थः अत्र न अभिप्रेतः । सभाम् आगत्य जनैः शान्ततया उपविश्य यत् श्रुतं तदर्थं धन्यवादाः अर्पणीयः, कृतज्ञता ज्ञापनीया । अतः, तदनुगुणः एव वाक्यप्रयोगः चिन्तनीयः अत्र ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

१५६. भवता यत् उपकृतं तदर्थम् अहम् **आभारी** अस्मि ।

‘**कृतज्ञः अस्मि**’ इति प्रयोक्तव्यम् । वाक्यान्तरं वा चिन्तनीयम् । आभारशब्दस्य अर्थः पूर्वम् उक्तः इव । वाक्यप्रयोक्ता कृतज्ञत्वम् इच्छति। आभारशब्दस्य तादृशं सामर्थ्यं नास्ति । तस्मात् स च परिहरणीयः इव एतादृशेषु प्रसङ्गेषु ।

१५७. लेखनस्य अन्ते लिख्यते ‘**साभारम्**’ इति ।

कृतज्ञतापूर्वम् कस्माच्चित् मूलत् यदा विषयः उद्ध्रियते तदा प्रादेशिकभाषायाम् एतादृशः क्रियते । किन्तु न एषा संस्कृतशैली । आभारशब्दः न हि कृतज्ञतां गमयति । अतः, ‘**सकार्तज्ञ्यम् उद्धृतम्**’, ’**कृतज्ञतापूर्वकम् उद्धृतम्**’ इत्यादयः प्रयोगाः प्रसङ्गेऽस्मिन् चिन्तनीयाः ।

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.